International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 132-135
© 2019 IJSR
www.anantaajournal.com
Received: 10-05-2019
Accepted: 12-06-2019

**डॉ. गणेश पण्डितः**
सहायकाचार्यः, शिक्षाविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

Correspondence
**डॉ. गणेश पण्डितः**
सहायकाचार्यः, शिक्षाविभागः
राजीवगान्धीपरिसरः, शृङ्गेरी,
कर्नाटक, भारत

# बोधस्तरशिक्षणस्य समस्याः परिहारोपायाश्च

**डॉ. गणेश पण्डितः**

**शोधसारः**

अथ शिक्षणं शिक्षकस्य कर्तव्यकर्म वर्तते। इदं च शिक्षणम् एका विशिष्टा प्रक्रिया वर्तते इति तु विदितचरमेव। शिक्षणप्रक्रियायां साफल्यसंपादनाय आधुनिकाः शिक्षाशास्त्रज्ञाः प्रविधिशास्त्रमप्यवलम्बन्ते। प्रविधिशास्त्रे शिक्षणस्य वैज्ञानिकं विश्लेषणं क्रियते। शिक्षणस्य त्रयः स्तराः शिक्षणस्य वैज्ञानिकविश्लेषणेनैव नयनपथमवातरन्। स्मृतिस्तरः, बोधस्तरः, चिन्तनस्तरश्चेति शिक्षणस्य त्रयः स्तराः सुप्रसिद्धाः सन्ति।

स्मृतिस्तरे शिक्षणं छात्राणां स्मरणशक्तेः संवर्धनाय उपकरोति। प्राथमिकस्तरेऽस्मिन् शिक्षकस्यैव प्रधानं पात्रं वर्तते न तु छात्रस्य। अस्मिन् स्तरे बालेभ्यः कंठस्थीकरणाय शिक्षितविषयस्य च प्रत्यास्मरणाय बलं दीयते। स्तरोऽयं बोधचिन्तनस्तरयोः पूर्ववर्ती वर्तते। स्मृतिस्तरशिक्षणात् परमेव बोधस्तरशिक्षणं प्रस्तुतीक्रियते।

बोधस्तरशिक्षणं यद्यपि द्वितीयस्थानीयं वर्तते तथापि पूर्वोत्तरवर्तिनोः सम्पर्कसेतुरिव कार्यं कुरुते। अस्मिन् स्तरे बालाः पूर्वाधीतस्य विषयस्य विभिन्नेषु प्रसङ्गेषु अनुप्रयोगक्षमतां प्राप्नुवन्ति। विशिष्य किशोराणां स्तरः बोधस्तरे अन्तर्भवति। अत एव अस्य स्तरस्य महन्महत्त्वम् उपकल्पितं वर्तते। निर्दिष्टविषये तन्नाम शिक्षितविषये नैपुण्यम् अथवा पाण्डित्यं संपादयितुं पूरकं शिक्षणम् अस्मिन् स्तरे दीयते। शोधपत्रेऽस्मिन् बोधस्तरस्य वैशिष्ट्यानि समस्याश्च सोदाहरणं निरूप्यन्ते।

**कुटशब्दः** बोधस्तरशिक्षणस्य समस्या, परिहारोपायाश्च

प्रस्तावना

शिक्षणम् एका विशिष्टा प्रक्रिया वर्तते इति तु विदितचरमेव। शिक्षणप्रक्रियायां साफल्यसंपादनाय आधुनिकाः शिक्षाशास्त्रज्ञाः प्रविधिशास्त्रमप्यवलम्बन्ते। प्रविधिशास्त्रे शिक्षणस्य वैज्ञानिकं विश्लेषणं क्रियते। शिक्षणस्य त्रयः स्तराः शिक्षणस्य वैज्ञानिकविश्लेषणेनैव नयनपथमवातरन्।

स्मृतिस्तरः, बोधस्तरः, चिन्तनस्तरश्चेति शिक्षणस्य त्रयः स्तराः सुप्रसिद्धाः सन्ति। स्मृतिस्तरे शिक्षणं छात्राणां स्मरणशक्तेः संवर्धनाय उपकरोति। प्राथमिकस्तरेऽस्मिन् शिक्षकस्यैव प्रधानं पात्रं वर्तते न तु छात्रस्य। अस्मिन् स्तरे बालेभ्यः कंठस्थीकरणाय शिक्षितविषयस्य च प्रत्यास्मरणाय बलं दीयते। स्तरोऽयं बोधचिन्तनस्तरयोः पूर्ववर्ती वर्तते। स्मृतिस्तरशिक्षणात् परमेव बोधस्तरशिक्षणं प्रस्तुतीक्रियते।बोधस्तरशिक्षणं यद्यपि द्वितीयस्थानीयं वर्तते तथापि पूर्वोत्तरवर्तिनोः सम्पर्कसेतुरिव कार्यं कुरुते। अस्मिन् स्तरे बालाः पूर्वाधीतस्य विषयस्य विभिन्नेषु प्रसङ्गेषु अनुप्रयोगक्षमतां प्राप्नुवन्ति। विशिष्य किशोराणां स्तरः बोधस्तरे अन्तर्भवति। अत एव अस्य स्तरस्य महन्महत्त्वम् उपकल्पितं वर्तते। निर्दिष्टविषये तन्नाम शिक्षितविषये नैपुण्यम् अथवा पाण्डित्यं संपादयितुं पूरकं शिक्षणम् अस्मिन् स्तरे दीयते।

बोधस्तरे बोधितस्य विषयस्य सुबोधः यथा बालानां स्यात् तथा प्रयासः क्रियते। बोधितविषयः बालेन अवबुद्धः वा न वा इत्येतत् शिक्षकेण अवश्यं परीक्षणीयम्। यदि विषयः बालेन नावबुद्धः तर्हि तस्य अन्तर्दृष्टेः विकासो न भविष्यति। स्वतन्त्रचिन्तनक्षमतायाः विकासे तार्किकशक्तेः संवर्धने च बोधस्तरशिक्षणम् अनिवार्यं विद्यते।

बोधस्तरशिक्षणस्य प्रभावेण बालेषु अर्जितज्ञानस्य विभिन्नेषु प्रसङ्गेषु अनुप्रयोगसामर्थ्यं समायाति। ज्ञानस्य सङ्घटने नूतनज्ञानस्य प्राचीनज्ञानेन सह संयोजने अयं स्तरः नितराम् उपकरोति। पाठितविषये प्रभुत्वसम्पादनाय एव अस्मिन् स्तरे शिक्षणस्य नियोजनं क्रियते। ' मोरिसन् ' वर्यः बोधस्तरशिक्षणस्य प्रतिमानमरचयत्। तदीये प्रतिमाने बोधस्तरशिक्षणे पञ्च सोपानानि स्युरिति उल्लिखितमस्ति। तानि यथा -

१. अन्वेषणम्

२. प्रस्तुतीकरणम्

३. आत्मसात्करणम्

४. व्यवस्थापनम्

५. अभिव्यक्तिः

बालेषु जिज्ञासाप्रवृत्तेः अन्वेषणप्रवृत्तेः वा अभावे सुबोधः नैव भवति। अत एव प्रथमसोपानस्य नामकरणम् अन्वेषणम् इति। प्रश्नकरणेन पाठ्यवस्तुनः विश्लेषणेन अन्वेषणप्रवृत्तिः उद्बुद्धा भविष्यति। नवनवीनतथ्यानाम् अन्वेषणपरः विषयः सर्वादौ शिक्षणे स्यादिति अत्र आशयः।

द्वितीयसोपाने प्रस्तुतीकरणं निक्षिप्तम् अस्ति। शिक्षणस्य प्रस्तुतीकरणं खण्डशः कर्तव्यमिति ' मोरिसन् ' वर्यः अवदत्। लघुषु खण्डेषु विभक्तं ज्ञानराशिं बालः अवबोद्धुं प्रभवति। किञ्च निदानात्मककार्यैः शिक्षणस्य अग्रे सरणमत्र संभवति। पाठस्य आवृत्तिरपि प्रस्तुतीकरणस्यैव एकम् अङ्गं वर्तते। एवं विभिन्नोपायैः पाठस्य प्रस्तुतीकरणेन शिक्षणं मनोवैज्ञानिकक्रमेण सुष्ठु च सम्पद्यते।

आत्मसात्करणं (Assimilation) तृतीयं सोपानं वर्तते।अस्मिन् सोपाने शिक्षितस्य विचारस्य स्वायत्तीकरणाय बालेभ्यः मुक्तावसराः प्रकल्प्यन्ते। आत्मसात्करणाय बोधस्तरशिक्षणे सोपानमिदं नूनमुपकरोति।एवमेव व्यवस्थापनम् इत्येतत् चतुर्थे सोपाने वर्तते। शिक्षितस्य स्वायत्तीकृतस्य च व्यवस्थापनं यथा मस्तिष्के स्यात् तथा इदं सोपानं वर्तते। अर्जितस्य अभिव्यक्त्यै यथा अवसरः स्यात् तथा प्रकल्पनमत्र क्रियते।

बोधस्तरशिक्षणे शिक्षकः कक्ष्याव्यवहारस्य प्रमुखनियन्त्रकः वर्तते। परन्तु शिक्षकच्छात्रौ उभावपि सक्रियौ भवतः। स्वविचारान् (अवबुद्धान्) प्रस्तुतीकर्तुं छात्रेभ्यः मुक्तावसरः वर्तत एव। आन्तरिकबाह्यप्रेरकयोः प्रभावेण शिक्षणमपि अत्र आकर्षकं सिध्यति। अस्मिन् स्तरे शिक्षितस्य विषयस्य बोधः जातः वा नवेति परीक्षितुं मूल्याङ्कनप्रणालयः अपि प्रविधिज्ञैः आविष्कृताः सन्ति। एतेषां प्रयोगेण एव शिक्षणस्य साफल्यं विज्ञातुं शक्नुमः। तत्र प्रमुखाः विधयः यथा –

१. लिखितविधिः

२. मौखिकविधिः

३. निबन्धात्मकविधिः

४. वस्तुनिष्ठविधिः

५. अभिक्रमितानुदेशनम् इत्यादयः।

यद्यपि बोधस्तरशिक्षणाय सुयोगानि प्रतिमानानि अनल्पानि सन्ति तथापि एतेषु प्रतिमानेषु काश्चन न्यूनताः अपि सन्त्येव। उदाहरणार्थम् – एतेषु प्रतिमानेषु मानवीयव्यवहारणां मूल्यानां च कृते किमपि स्थानं नैव कल्पितं वर्तते। अनेन बालानां बौद्धिकशक्तेः विकासमात्रं स्यात् न तु सर्वाङ्गीणविकासः। एवमेव मानवीयपक्षाणां महत्त्वाभावात् शिक्षणमपि यान्त्रिकमेव सिद्ध्यति। यान्त्रिकशिक्षणेन नास्ति किमपि प्रयोजनम्। एवं मानवीयव्यवहाराणाम् अवहेलना एका प्रधाना समस्या वर्तते।

शिक्षणे बालानां पक्षत्रयस्य अपि सममात्रेण विकासाय अवसरः कल्पनीयः इत्युच्यते। परन्तु अत्र तन्नाम बोधस्तरशिक्षणे केवलं ज्ञानात्मकपक्षस्योपरि एव अधिकं बलं दीयते। भावात्मकक्रियात्मकपक्षयोः उपरि नात्र ध्यानं दीयते। अनेन बालानां परिपूर्णः विकासः न संभवति। केवलं ज्ञानात्मकपक्षस्यैकस्य संवर्धनेन बालः सर्वेषु क्षेत्रेषु साफल्यं प्राप्तुं न शक्नोति। एवं द्वयोः पक्षयोः अवहेलना क्रियते इत्येतदेव एका प्रधाना समस्या वर्तते।

बोधस्तरशिक्षणे बालानां नियतोपस्थितिरनिवार्या। नगरेषु पत्तनेषु वा वर्तमानाः छात्राः विनाक्लेशम् एतादृशं शिक्षणं प्राप्तुं शक्नुयुः।परन्तु ग्राम्याः छात्राः नूनमेव क्लिश्नन्ति। ग्राह्यमूल्यानाम् अभावोऽत्र कारणम्। एषः अभावः बोधस्तरशिक्षणस्य एका महती समस्या वर्तते। एतादृश्यः समस्याः बोधस्तरशिक्षणे नूनमेव बाधां जनयन्ति।

बोधशिक्षणे गुणवत्तासंवर्धनाय समस्यानां च निवारणाय केचन मूलभूताः अंशाः मनसि कर्तव्याः। ते च यथा –

१) पाठस्य उद्देश्यं स्पष्टं क्रियासाध्यं च भवेत्।
२) पाठयोजना छात्राणां मानसिकस्तरानुरूपा क्रमबद्धा च स्यात्।
३) पाठ्यक्रमस्य विविधतत्त्वानां समावेशः तत्र स्यात्।
४) अभिक्रमिताधिगमस्स्य शिक्षणयन्त्राणां च समुचितः प्रयोगः नूनमेव कर्तव्यः।
५) प्रत्येकमपि पाठे अभ्यासस्य महन्महत्त्वं स्यात्।
६) आन्तरिकाभिप्रेरणानाम् उपरि अधिकं बलं देयम्।
७) छात्राणाम् आकाङ्क्षास्तरस्यापि अभिवर्धनाय प्रयासः विधेयः।
८) छात्राणां कृते पौनःपुन्येन अभिप्रेरणाय पूरकाः अंशाः शिक्षणस्य योजनायां स्युः।
९) स्मृतिस्तरशिक्षणात् परमेव बोधस्तरशिक्षणं प्रस्तुतीकर्तव्यम्। अत्र शिक्षणं न कदापि वयसः अनुगुणं देयम्।
१०) प्रत्येकमपि सोपानस्य क्रमशः पूरणं कृत्वैव अग्रे पदं निदधातुम् अवसरः स्यात्।

बोधस्तरः पूर्वोक्तरीत्या स्मृतिचिन्तनस्तरयोः जोडनसेतुरिव कार्यं करोति। अतः उभावपि स्तरौ मनसि निधायैव शिक्षकेण योजना निर्मेया। यदा चिन्तनस्तरस्य पाठः प्रस्तुतीक्रियते तदापि बोधस्तरे बालेन कथं शिक्षणं प्राप्तम् ? के के प्रविधयः तस्मिन् स्तरे प्रयुक्ताः इत्येतत्सर्वं विज्ञेयम्। केवलम् एकस्यैव स्तरस्योपरि बलप्रदानेन शिक्षणं सफलं न सिद्ध्यति। अत एव शिक्षणयोजनायाः निर्माणावसरे त्रयाणामपि स्ताराणां तौलनिकम् अध्ययनं प्रत्येकमपि शिक्षकेण संपादनीयम्। एवं करणेन न कापि समस्या समुदेति। अत्र सौकर्याय स्तरत्रयमपि कोष्ठकमाध्यमेन प्रस्तुतीक्रियते। अस्य कोष्ठकस्य परिशीलनेन प्रत्येकमपि स्तरस्य उद्देश्यवैशिष्ट्यलक्ष्यादीनि विज्ञातुं शक्यन्ते। तद्यथा -

| तुलनात्मकः बिन्दुः | स्मृतिस्तरः | बोधस्तरः | चिन्तनस्तरः |
|---|---|---|---|
| १. प्रवर्तकः | हरबर्टवर्यः (Herbert) | मोरिसन् वर्यः (Morrison) | हण्ट् वर्यः (Hunt) |
| २. शिक्षणप्रकृतिः | सामान्यः विचारः | पूर्णविचारः | उत्कृष्टविचारः |
| ३. उद्देश्यम् | ज्ञानप्राप्तिः | बोधः तथा अनुप्रयोगः | विश्लेषणसंश्लेषणयोः उपरि बलम् |
| ४. पाठ्यवस्तु | तथ्यात्मकम् | व्याख्यात्मकम् | चिन्तनपूर्णम् |
| ५. अधिगमप्रकृतिः | तथ्यपूर्णम् | अन्तर्दृष्टिः बोधश्च | स्वतन्त्रचिन्तनं वैज्ञानिकदृष्टिः |
| ६. कक्ष्यावातावरणम् | निष्क्रियम् | आलोचनात्मकम् | विवादपूर्णम् |
| ७. अधिगमसंरचना | सङ्केतः, श्रृङ्खला | सम्बन्धः | समस्यासमाधानपरा |
| ८. शिक्षकभूमिका | नियन्त्रकः | सहयोगपूर्णः | लोकतान्त्रिकः |
| ९. अधिगमसिद्धान्तः | उद्दीपकानुक्रियारूपः | अन्तर्दृष्टिसिद्धान्तः | मनोवैज्ञानिकसूत्राश्रितः |
| १०. युक्तयः | व्याख्यानम् | प्रश्नोत्तरम् | विचारविमर्शः |
| ११. अभिप्रेरणा | बाह्यः | बाह्या आन्तरिकी च | आन्तरिकी |
| १२. परीक्षणम् | मौखिकम् लिखितम् प्रत्यास्मरणम् | व्याख्यात्मकम् सम्बन्धात्मकम् वस्तुनिष्ठम् | निबन्धात्मकम् समीक्षात्माकम् इत्यादि |

एवमत्र स्तरत्रयस्य सामान्यः परिचयः प्रदत्तः वर्तते। एतेषां परिचयबलेन शिक्षकाः छात्रान् परीक्ष्य स्तरानुरूपं शिक्षणकार्यं संपादयन्ति चेत्तर्हि छात्राः शिक्षकाश्च स्वकर्मणि नूनमेव साफल्यं विन्दन्ति। बोधस्तरशिक्षणेन सम्बद्धानां समस्यानां परिचयसंपादनाय परिहारोपायान्वेषणाय एतदनिवार्यमप्यस्ति।

## संदर्भ


१. त्यागी (2001) – भारत में शिक्षा का विकास, अमर प्रकाशन, नई दिल्ली

२. मिश्रा, विद्यानिवास (2003) – भारतीय दृष्टि, अमर प्रकाशन, नई दिल्ली

३. प्रो. एस्. पी. रुहेला (2006) – विकासोन्मुख भारतीय समाज में शिक्षक और शिक्षा, विनोद पुस्तकमन्दिर, आगरा

४. जे. सी. अग्रवाल (2008) – शैक्षिक तकनीकी, विनोद पुस्तकमन्दिर, आगरा

५. Nanda RT.– Contemporary Approaches, Regency Publications, New Delhi, 1999

६. Sheshadri C.– Education in values, NCERT, New Delhi, 1992

७. Mathur SS.– School management, Vinod Pustak Mandir, Agra, 1990

८. Sharma R. Educational Technology, Vinod Pustak Mandir, Agra, 1990